तृप्यमाणः, तर्प्यमाणः, तितर्पिष्यमाणः, तरीतृप्यमाणः ;
तर्पः, तर्पः, तितर्पिषः, तरीतृपः ;
तर्पितुम्, तर्पयितुम्, तितर्पिषितुम्, तरीतृपितुम् ;
[1]तृप्तिः, तर्पणा, तितर्पिषा, तरीतृपा ;
तर्पणम्, तर्पणम्, तितर्पिषणम्, तरीतृपणम् ;
[2]तर्पित्वा, तर्पयित्वा, तितर्पिषित्वा, तरीतृपित्वा ;
सन्तृप्य, सन्तर्प्य, प्रतितर्पिष्य, प्रतरीतृप्य ;
तर्पम् २, तर्पित्वा २, } तर्पम् २, तर्पयित्वा २, } तितर्पिषम् २, तितर्पिषित्वा २, } तरीतृपम् २ ; तरीतृपित्वा २. }

## (772) " तृप तृप्तौ " (VI-तुदादिः-1307. अक. सेट्. पर.)

' तृफ ' इति क्षीरस्वामिप्रभृतयः पठन्ति ।

' तृप्नोति तृप्यतीत्येके प्रीणने श्नौ श्यनि क्रमात् ।' (श्लो. 133) इति देवः । अत्र पुरुषकारे—' तृप तृप्तौ ' तुदादिश्चायम् । ' इत्युक्तम् ।

तर्पकः-र्पिका, तर्पकः-र्पिका, तितर्पिषकः-षिका, तरीतृपकः-पिका ;
तर्पिता-त्री, तर्पयिता-त्री, तितर्पिषिता-त्री, तरीतृपिता-त्री ;
[3]तृपन्-न्ती-ती, तर्पयन्-न्ती, तितर्पिषन्-न्ती ; —
तर्पिष्यन्-न्ती-ती, तर्पयिष्यन्-न्ती-ती, तितर्पिषिष्यन्-न्ती-ती ; —
[4]व्यतितृपमाणः, तर्पयमाणः, —, तरीतृप्यमाणः ;
व्यतितृपिष्यमाणः, तर्पयिष्यमाणः, —, तरीतृपिष्यमाणः ;
सुतृप्-सुतृब्-सुतृपौ-सुतृपः ; — —
तृपितम्-[A]तः, तर्पितः, तितर्पिषितः, तरीतृपितः-तवान् ;

1. ' तितुत्र—' (7-2-9) इति इण्णिषेधः ।
2. धातोरस्य सेट्त्वात्, क्त्वायाम्, ' न क्त्वा सेट् ' (1-2-18) इति किस्वनिषेधाद् गुणः ।
3. ' तुदादिभ्यः—' (3-1-77) इति शः विकरणप्रत्ययः । तस्य ङिद्वद्भावादङ्गस्य गुणो न ।
4. ' कर्तरि कर्मव्यतीहारे ' (1-3-14) इति शानच् ।

A. ' शत्रूँल्लोभकरेफरीढितृपिता तृम्फाय तोफार्थिनो
राज्ञो नित्यमतुम्पकात् वितुफती बन्धूंश्च सन्तुम्फती ।' धा. का. 2.74.